भारतीयसशस्त्रसेनायाः प्रतिकारात्मककार्याणि पाकिस्तानेन अधिकृत-जम्मू-कश्मीरे च आतङ्क-स्थलेषु प्रहारं कृत्वा शततोप्यधिकाः आतङ्कवादिनः मारिताः आसन् पहलगामातङ्क्याक्रमणस्य अनन्तरं विभिन्नराजनैतिकदलानां नेतॄणां उपस्थितौ सर्वदलीयोपवेशनम् अपि सर्वकारेण आयोजितम् आसीत् ।

-----------------------------------------------

प्रधानमन्त्री- मन्त्रीपरिषद

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां केन्द्रियमन्त्री-परिषद: उपवेशवस्य अध्यक्षतां कुर्वन्नस्ति। पहलगामे आतङ्क्याक्रमण-सिन्दूराभियानयो: अन्नतरम् इदं प्रथमम् उपवेशनमस्ति।

-----------------------------------------------

पूर्वन्यायाधीश – महाभियोग:

संसदीय-कार्य-मन्त्रिणा किरेन रिजिजू इत्यमुना प्रोदीरितं यत् प्रशासनं दिल्ली-उच्च-न्यायालयस्य पूर्वन्यायाधीशं यशवन्त-वर्माणं विरुध्य महाभियोग:-प्रस्तावस्य आनयनार्थं राजनीतिक-दलानां सामान्य-सहमत्यै कार्यं कुर्वदस्ति।

-----------------------------------------------

मोदी-ऑस्ट्रेलिया-उप-प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्रमोदी तथा आस्ट्रेलियादेशस्य उपप्रधानमन्त्री रक्षामन्त्री च रिचर्ड मार्लेसः इत्येतौ अद्य भारत-ऑस्ट्रेलिया-देशयो: मध्ये व्यापक-सामरिकसहभागिताम् इतोप्यधिकं सुदृढयितुं विचाराणां आदान-प्रदानं कृतवन्तौ। आस्ट्रेलियादेशस्य उपप्रधानमन्त्री अद्य अपराह्णे नवदिल्ल्यां प्रधानमन्त्रिणं मोदिनं मिलित्वा सीमपार आतङ्कवादविरुद्धे भारतस्य युद्धे स्वदेशस्य समर्थनं प्रदत्तवान्। उभौ नेतारौ रक्षा औद्योगिकसहकार्यं, आपूर्तिशृङ्खलाः, महत्त्वपूर्णाः खनिजाः, नवीनाः उदयमानाः च प्रौद्योगिकीः इत्यादिषु प्रमुखक्षेत्रेषु सहकार्यं वर्धयितुं महत्त्वं रेखांकितवन्तौ। तौ पुनः पुष्टिं कृतवन्तौ यत् स्थिरस्य, सुरक्षितस्य, समृद्धस्य च हिंद-प्रशांतयोः दृष्टिकोणयोः द्विपक्षीयसहकार्ययाणां मार्गदर्शनं निरन्तरं क्रियते। सद्यः एव

सङ्घीयनिर्वाचने आस्ट्रेलियादेशस्य लेबर पार्टीति दलस्य ऐतिहासिकविजयाय प्रधानमन्त्री मोदी तस्य अभिनन्दनं कृतवान्। अस्य वर्षस्यान्ते भारते आयोक्ष्यमाणाय णे वार्षिकशिखरसम्मेलनाय सः आस्ट्रेलियादेशस्य प्रधानमन्त्रिणं एन्थोनी अल्बानी इत्यस्मै आमन्त्रितवान्।

---------------------------------------------

भाजपा-सुधांशुत्रिवेदी

अद्य भाजपादलेन सिन्दूराभियानस्य कथितालोचनायै कांग्रेसदलस्य वरिष्ठनेतुः राहुलगान्धिनः उपरि लक्ष्यं साधितम् । नवदिल्ल्यां वार्ताहरान् सम्बोधयन् भाजपाप्रवक्ता सुधांशुत्रिवेदी इत्येषः प्रोक्तवान् यत् येन प्रकारेण राहुलगान्धिना सशस्त्रबलानां सफलतायाः तुलना आत्मसमर्पणेन सह कृता तेन तेषां शौर्यस्य बलिदानस्य च स्पष्टापमानं प्रत्यक्षीभवति। तेन कांग्रेसदलस्योपरि प्रश्नोत्थापयता कथितं यत् षड्विंशतिः/एकादशेति मुम्बई-आक्रमणानन्तरं यूपीए-सर्वकारेण कथितमासीत् यत् पाकिस्तानेन सह समग्रवार्ता आतङ्कवादी-गतिविधिभिः नैव प्रभावितो भविष्यति।

---------------------------------------------

भारत-एडीबी:

भारतेन एशियाई-विकास-वित्तालयाः पाकिस्तानाय वित्तीयसहायताप्रदानेन संसाधनानां दुरुपयोगः भविष्यतीति सङ्केतिताः। सूत्रानुसारं भारतेन एडीबी-संसाधनानां सम्भावित-दुरुपयोगविषये गहनचिन्ता प्रकटिता । भारतेन एतत् प्रकाशितं यत् सकलान्तरिकोत्पादत्वेन पाकिस्तानस्य करसंग्रहः अष्टादशाधिक-द्विसहस्रतमे वित्तीयवर्षे त्रयोदश-दशमलव-शून्यादपचीय त्रयोविंशत्यधिक-द्विसहस्रतमे वित्तीयवर्षे नव-दशमलव-द्विप्रतिशतं समभवत्। नवदिल्ली इय्यनेन पाकिस्तानस्य वर्तमान-शासन-प्रणालीमालक्ष्य आपत्तिः प्रकटीकृता।

-----------------------------------------------

<u>असम-जलाप्लाव:</u>

असमराज्ये जलाप्लावेन एकविंशति-जनपदेषु त्रिंशत्सहस्राधिक-षड्लक्षाधिकाः जनाः प्रभाविताः। सहैव राज्ये मृतकानां सङ्ख्या समेध्य द्वादशमितं समभवत्। विगतेषु चतुर्विंशतिहोरासु राज्ये जलाप्लावेन षड्जनाः मृत्युमुपगताः। सहैव राज्ये पञ्चदशशताधिकाः ग्रामाः जलाप्लावेन प्रभाविताः। एवमेव सप्तशताधिक-चतुर्दशसहस्रपरिमितं सस्यक्षेत्रं क्षतिग्रस्तमभवत् । राज्यसर्वकारेण रक्षाप्रवर्तनार्थं एस-डी-आर-एफ-दलानि एन-डी-आर-एफ-दलानि च नियोजितानि सन्ति। असमराज्यस्य आपत्प्रबन्धन-प्राधिकरणानुसारं त्रयोविंशत्यधिक-द्विशतशिविरेषु चत्त्वारिंशत्सहस्रजनाः स्थितास्सन्ति।

-----------------------------------------------

<u>प्रधानमन्त्री-पहलगाम</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां केन्द्रीयमन्त्रिपरिषदः उपवेशनस्य आध्यक्षं विधास्यति। पहलगामातङ्क्याक्रमणानन्तरं सहैव सिन्दूर-सैन्याभियानान्तर्गतं पाकिस्तानदेशं विरुध्य भारतस्य कार्याचरणानन्तरं एतादृशमिदं प्रथमोपवेशनं भविष्यति ।

-----------------------------------------------

<u>प्रधानमन्त्री-जम्मू-कश्मीर यात्रा</u>

प्रधानमन्त्री नरेन्द्रमोदी अस्य मासस्य षष्ठे दिनाङ्के जम्मू-कश्मीरस्य यात्राङ्करिष्यति। अत्रावसरे सः षड्चत्त्वारिंशत्सहस्रकोटि-रुप्यतोप्यधिकाः विकास-परियोजनाः राष्ट्राय समर्पयिष्यति। क्षेत्रे सम्पर्क-समेधनार्थं प्रधानमन्त्री चेनाब-रेलसेतोः अञ्जी-सेतोश्च उद्घाटनं विधास्यति। अवसरेऽस्मिन् प्रधानमन्त्री वन्दे-भारत-रेलयानेभ्यः अपि हरितपताकां प्रदर्शयिष्यति।

-------------------------------------------------

<u>राजनाथ-मार्लेसौ</u>

रक्षामन्त्री राजनाथसिंहः सहैव ऑस्ट्रेलियायाः उप-प्रधानमन्त्री रक्षामन्त्री रिचर्ड-मार्लेसः इत्यनयोः मध्ये अद्य नवदिल्ल्यां उपवेशनं समभवत्। उपवेशनावधौ ऑस्ट्रेलियादेशस्य उप-प्रधानमन्त्रिणा आतङ्कवादं विरुध्य भारतेन सह ऐक्यं प्रकटितवान्। तेन सबलं प्रोक्तं यत् भारत-ऑस्ट्रेलियादेशौ रक्षा-समुद्रीसुरक्षाप्रकरणेषु च परस्परसहयोगिनौ स्तः।

रक्षामन्त्रिणा राजनाथसिंहेन स्वीयः ऑस्ट्रेलिया-समकक्षीयः देशस्य समक्षे पश्चिमक्षेत्रेषु समुत्पन्नसङ्कटानां विषये संसूचितः।

इतः पूर्वं श्रीमार्लेसः दिल्ल्याः मानेकशॉ-केन्द्रे गार्ड-ऑफ-ऑनर-पुरस्कारेण सभाजितः। ऑस्ट्रेलियादेशस्य मन्त्रिणा दिल्ल्यां राष्ट्रिय-युद्ध-स्मारके पुष्पाञ्जलिरपि समर्पितः।

-------------------------------------------------

<u>हज-तीर्थयात्रा</u>

अद्य आरब्धायां वार्षिकपञ्चदिवसीयहजयात्रायां भारतं समेत्य विश्वस्य प्रायः अष्टादशलक्षाधिकाः तीर्थयात्रिणः सऊदी अरबदेशस्य मीनानगरे सम्प्राप्स्यन्ति। तीर्थयात्रिणः पवित्र-मक्का-नगरात् मीना-तंबूनगरे समागन्तुं यात्रां आरब्धवन्तः । तत्र रात्रौ निवसन्ति, श्वः प्रातःकाले अराफात इत्यस्य उद्यानं प्रति गमिष्यन्ति, यत्र ते हजेत्यस्य दिवसस्य मुख्यसंस्कारं, नमाज-प्रार्थनापाठं करिष्यन्ति। पूर्वं अल्पसंख्यकमन्त्रालयेन सामाजिकमाध्यमेषु एकस्मिन् सन्देशे उक्तं यत् प्रत्येकेभ्यः भारतीयहजयात्रिभ्यः सरल-गरिमापूर्णयात्रां सुनिश्चेतुं मन्त्रालयः सर्वविध-प्रयासरतोऽस्ति।

-------------------------------------------------

<u>दक्षिणकोरिया-राष्ट्रपतिः</u>

लिबरल-डेमोक्रेटिक-पार्टीति दलस्य नेत्रा ली-जे-म्याङ्ग इत्यनेन अद्य दक्षिणकोरियादेशस्य एकविंशतितम-राष्ट्रपतित्वेन शपथग्रहणं कृतम्। तस्य कार्यकालं पञ्चवर्षाणि यावत् भविष्यति। प्रधानमन्त्री नरेन्द्रमोदी कोरियागणराज्यस्य राष्ट्रपतित्वेन निर्वाचितस्य ली- जे-म्याङ्ग इत्यस्य अभिनन्दनं कृतवान्। एकस्मिन् सामाजिकान्तर्जालीय-सन्देशे प्रधानमन्त्रिणा उक्तं यत् भारत-कोरियादेशौ विशेष-रणनीतिक-सहभागितां अग्रे विस्तारयितुं एकीभूय कार्यं कर्तुञ्च उत्सुकौ स्तः।

-----------------------------------------------

<u>नॉर्वे-चतुरङ्गक्रीडा</u>

पञ्चविंशत्यधिक-द्विसहस्रतमवर्षस्य नॉर्वे-चतुरङ्ग- क्रीडायां भारतीयक्रीडकः अर्जुन-ऐरिगैसी इत्येषः गतरात्रौ अमेरिकीय क्रीडकं फबियानो कारुआना इत्यमुं पराजित्य अष्टमेचक्रे विजितवान्।

।। इति वार्ता: ।।